AUG - 04311/III

# SANSKRIT

## Paper III

# संस्कृतम्

## तृतीयं प्रश्नपत्रम्

**समयः : 150 निमेषाः]** **[पूर्णाङ्काः : 200**

**सूचना :** (*i*) एतत्प्रश्नपत्रगताः आहत्य **19** (एकोनविंशतिः) प्रश्नाः समाधेयाः ।

(*ii*) अत्र प्रश्नक्रमाङ्काः **1** तः **2** तथा च **6** तः **19** अनिवार्याः ।

(*iii*) स्वविषयविभागगताः **3** तः **5** प्रश्नाः समाधेयाः ।

**पूर्णाङ्कविभाजनम् —**

| **प्रश्नक्रमाङ्कः** | **शब्दसंख्या** | **पूर्णाङ्काः** |
|---|---|---|
| 1—2 | प्रत्येकं 500 | प्रत्येकं 20 |
| 3—5 | प्रत्येकं 300 | प्रत्येकं 15 |
| 6—14 | प्रत्येकं 50 | प्रत्येकं 10 |
| 15—19 | प्रत्येकं 30 | प्रत्येकं 5 |
| | **आहत्य 2500** | **आहत्य 200** |

[P.T.O.

## SECTION I

1. अधोनिर्दिष्टयोः अन्यतरं विषयमाश्रित्य निबन्धं लिखत –

भारतीयदर्शनपरम्परा **अथवा** वृक्षो रक्षति रक्षितः ।

2. अधोनिर्दिष्टयोः अन्यतरं विषयमाश्रित्य निबन्धं लिखत –

विश्वभाषा संस्कृतम् **अथवा** रम्या रामायणी कथा ।

## SECTION II

### Elective I

3. पर्जन्यसूक्तस्य (ऋ. 5.83) रसग्रहणं कुरुत ।
4. ब्राह्मणग्रन्थोक्तम् अग्निहोत्रविधिं स्वरूपं च वर्णयत ।
5. यास्कमतानुसारं 'तिस्रो वै देवताः' इत्येतद्वाक्यं स्पष्टयत ।

***Or***

### Elective II

3. भर्तृहरिनिरूपितं शब्दब्रह्मस्वरूपं वर्णयत ।
4. पाणिनीयानुसारं समासप्रकारान् उपप्रकारांश्च सोदाहरणं विशदयत ।
5. पाणिनीयशिक्षानिरूपितान् विषयान् संक्षेपेण उपवर्णयत ।

***Or***

### Elective III

3. शाङ्करभाष्यमते ब्रह्मसूत्रस्य आनन्दमयाधिकरणं विशदयत ।
4. व्यासभाष्यानुसारम् अष्टाङ्गयोगं विवृणुत ।
5. सर्वदर्शनसङ्ग्रहे प्रतिपादितस्य बौद्धदर्शनस्य क्षणिकवादं निरूपयत ।

***Or***

### Elective IV

3. 'उपाधिस्तु द्विविधः' – मम्मटरीत्या विचारयत ।
4. काव्यपुरुषोत्पत्तिं विशदयत ।
5. 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' – आलोच्यताम् ।

***Or***

### Elective V

3. समुद्रगुप्तस्य स्तम्भलेखं विवृणुत ।
4. अभिलेखप्रकारान् उक्त्वा ताम्रपटानाम् ऐतिहासिकं महत्त्वं विशदीकुरुत ।
5. खारवेल्लकालिकानभिलेखान् वर्णयत ।

3.

4.

5.

## SECTION III

6. वैदिकभाषा अभिजातसंस्कृतभाषा च इत्यनयोः भेदान् स्पष्टीकुरुत ।

7. कठोपनिषदि वर्तमानं रथरूपकं विशदयत ।

8. यास्कनिर्दिष्टान् षड्भावविकारान् निरूपयत ।

9. 'भविष्यति' इति रूपस्य निष्पत्तिं प्रदर्शयत ।

10. सांख्यकारिकोक्तरीत्या सत्कार्यवादं विशदयत ।

11. रामायणगतानि उपाख्यानानि वर्णयत ।

12. अर्थशास्त्रे वर्णितां राज्ञः दिनचर्यां निरूपयत ।

13. भरतप्रणीतस्य रससूत्रस्य विवेचनं कुरुत ।

14. '............... तत्र श्लोकचतुष्टयम्' विधानमिदं सोदाहरणं स्पष्टीकुरुत ।

## SECTION IV

वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च । अस्य वेदान्तप्रकरणत्वात्तदीयैरेवानु-बन्धैस्तद्वत्तासिद्धेर्न ते पृथगालोचनीया: । तत्रानुबन्धो नामाधिकारिविषयसंबन्धप्रयोजनानि ।

अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेन आपाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्त: साधनचतुष्टयसंपन्न: प्रमाता ।

काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि । निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि । नित्यान्यकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि । नैमित्तिकानि पुत्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि । प्रायश्चित्तानि पापक्षयसाधनानि चान्द्रायणादीनि । उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि । एतेषां नित्यादीनां बुद्धिशुद्धि: परमं प्रयोजनम् । "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन" इत्यादिश्रुते: "तपसा कल्मषं हन्ति" इत्यादिस्मृतेश्च । उपासनानां तु चित्तैकाग्र्यम् । नित्यनैमित्तिकयोरुपासनानां चावान्तरफलं पितृलोकसत्यलोकप्राप्ति: "कर्मणा पितृलोको विद्यया देवलोक:" इत्यादि श्रुते: । साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थभोगविरागशमादिषट्कसंपत्तिमुमुक्षुत्वानि नित्यानित्यवस्तुविवेकस्तावद्ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम् । ऐहिकानां स्रक्चन्दनादिविषयभोगाणां कर्मजन्यतयानित्यत्ववदामुष्मिकाणामप्यमृतादिविषयभोगाणामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थभोगविराग: । शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्या: । शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रह: । दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् । निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य: उपरमणमुपरति: अथवा विहितानां कर्मणां विधिना परित्याग: । तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता । निगृहीतस्य मनस: श्रवणादौ तदनुगुणविषये च समाधि: समाधानम् । गुरूपदिष्टवेदान्तवाक्येषु विश्वास: श्रद्धा । मुमुक्षुत्वं मोक्षेच्छा । एवंभूत: प्रमाताधिकारी "शान्तो दान्त:" इत्यादिश्रुते: ।

15. वेदान्तशास्त्रोक्तदिशा "अनुबन्धचतुष्टयं" वर्णयत ।

16. परिच्छेदेऽस्मिन् प्रतिपादितम् अधिकारिलक्षणं स्पष्टयत ।

17. काम्यादिकर्मणां स्वरूपम् उदाहरणानि च लिखत ।

18. वेदान्तशास्त्रे प्रतिपादितं "साधनचतुष्टयं" वर्णयत ।

19. शमादिषट्कसम्पत्तिं विवृणुत ।

## ROUGH WORK



[P.T.O.

ROUGH WORK